# CBSE Class 12 Sanskrit Core 2024 - Set-4 (22) - Annual

## Question Paper

Conducted by the Central Board of Secondary Education (CBSE)

**Time Allowed: 3 Hours** **Maximum Marks: 80**

### General Instructions

(i) इस प्रश्नपत्र में कुल **18** प्रश्न और चार खण्ड हैं।

(ii) खण्ड क: प्रश्न 1। खण्ड ख: प्रश्न 2–4। खण्ड ग: प्रश्न 5–8। खण्ड घ: प्रश्न 9–18।

(iii) प्रत्येक प्रश्न में दिए गए विशिष्ट निर्देशों और आंतरिक विकल्पों के अनुसार उत्तर दीजिए।

(iv) उत्तर लिखने से पहले प्रश्न की संख्या अवश्य लिखिए।

## Section A

**1.**

संस्कृतसाहित्ये भारतवर्षस्य गौरवं स्थाने-स्थाने वर्णितं वर्तते । भारतभूमि: तु कर्मभूमि: । देवा: अपि अस्या: गीतानि गायन्ति । भारतीयसंस्कृते: आधारभूतं गुणद्वयम् वर्तते - त्याग: सेवा च । वयं संग्रहे विश्वासं न कुर्म: । अस्माकं श्रद्धा तु त्यागे एव । सर्वेषु मनुष्येषु एक: एव आत्मा । विविधजातिषु समुत्पन्ना: जना: भारते निवसन्ति । यदि सर्वे स्वार्थभावनाया: त्यागं कुर्यु:, सेवाभावनां च स्वीकुर्यु:, तदा अस्माकं देश: पुन: स्वप्राचीनं गौरवपदं प्राप्नुयात् । देशे ऐक्यभावं वर्धयितुं श्रीशंकराचार्य: देशस्य चतुषु कोणेषु चत्वारि मठानि स्थापितवान् । एतानि मठानि भारते सांस्कृतिकचेतनाया: प्रसारम् अकुर्वन् । नूनम् आध्यात्मिकता एव ऐक्यभावनायुक्ता अस्य अमूल्या सम्पत्ति: । यदि एषा सम्पत्ति: विनश्यति तदा मानवतायाः एव विनाश: भविष्यति ।

**1(अ).** एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्) / Answer in one word : (Only two questions)

(i) भारतभूमि: कीदृशी भूमि: ?

(ii) अस्माकं का त्यागे एव ?

(iii) आध्यात्मिकता अस्य देशस्य कीदृशी सम्पत्ति: ?

**1(आ).** पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्) / Answer in a complete sentence : (Only two questions)

(i) भारतीयसंस्कृते: आधारभूतं गुणद्वयं किं वर्तते ?

(ii) कदा अस्माकं देश: पुन: स्वप्राचीनं गौरवपदं प्राप्नुयात् ?

(iii) कीदृशा: जना: भारते निवसन्ति ?

**1(इ).**

अस्य अनुच्छेदस्य द्वित्रिशब्दात्मकं (समुचितं) शीर्षकं लिखत ।

**1(ई)(i).**

'गुणद्वयम्' इति पदस्य विशेषणपदं चिनुत ।

(A) त्याग: (B) आधारभूतम्
(C) भारतीयसंस्कृते: (D) अस्ति

**1(ई)(ii).**

'देवा:' इति पदस्य क्रियापदम् चिनुत ।

(A) अस्ति (B) कुर्म:
(C) गायन्ति (D) कुर्यु:

**1(ई)(iii).**

'स्थापितवान्' इति क्रियापदस्य कर्तृपदं चिनुत ।

(A) जना: (B) एषा
(C) एतानि (D) श्रीशंकराचार्य:

**1(ई)(iv).**

'संग्रह:' इति पदस्य विपर्ययपदम् अत्र किं प्रयुक्तम् ?

(A) सेवा (B) त्याग:
(C) सम्पत्ति: (D) समुत्पन्ना

## Section B

**2.**

भवान्/भवती प्रधानाचार्यं प्रति सच्चरित्रप्रमाणपत्र-प्राप्त्यर्थं लिखिते पत्रे, मञ्जूषा-प्रदत्तशब्दैः रिक्तस्थानपूर्तिं कृत्वा पत्रं पुन: लिखतु ।
(i)___,
प्रधानाचार्य:,
ज्ञान स्वरूप विद्यालय:, नव दिल्ली,
(ii)___
अहं सविनयं निवेदयामि यत् मम परीक्षा-परिणाम: (iii)___ जात: । अहं द्वादशकक्षायां पञ्चाशीतिः प्रतिशतम् (iv)___ प्राप्य उत्तीर्णवान् । सम्प्रति स्नातककक्षायाम् प्रवेशार्थं सच्चरित्रप्रमाणपत्रस्य (v)___ वर्तते । कृपया मह्यम् (vi)___ प्रदाय (vii)___ कुर्वन्तु । येन महाविद्यालये मदीय: (viii)___ सुलभ: स्यात् । आशासे एतत् प्रमाणपत्रं (ix)___ प्राप्स्यति ।
धन्यवादा: ।
भवदीय: शिष्य:/भवदीया शिष्या,
दिनाङ्क:___, (x)___
मञ्जूषा: महोदया:, आवश्यकता, सेवायाम्, उद्घोषित:, सच्चरित्रप्रमाणपत्रम्, अनुगृहीतं, शीघ्रम्, श्याम:/श्यामा, प्रवेश:, अङ्कान् ।

---

**3(क).**

मञ्जूषा-प्रदत्तशब्दानां सहायतया अधोलिखितायां लघुकथायां रिक्तस्थानानि पूरयित्वा कथां पुन: लिखत । दाक्षिणात्ये जनपदे (i)___ नाम नगरम् आसीत् । तस्य समीपम् एक: (ii)___ आसीत् । तत्र चित्रग्रीव: कपोतराज: (iii)___ । एकदा कश्चिद् व्याध: तत्र आगच्छत् । स: वृक्षस्य (iv)___ जालं प्रसारयति । उपरि च (v)___ क्षिपति । तण्डुलान् (vi)___ आगता: कपोता: जाले बद्धा: अभवन् । सर्वे कपोता: मिलित्वा (vii)___ सह उदपतन् । ते जालं नीत्वा मूषकराजस्य (viii)___ पार्श्वे अगच्छन् । स: तेषाम् (ix)___ आसीत् । हिरण्यक: जालम् (x)___ । एवं हि कपोता: मुक्ता: अभवन् ।
मञ्जूषा: हिरण्यकस्य, मित्रम्, भक्षयितुम्, अध:, विशालवृक्ष:, महिलारोप्यम्, वसति स्म, जालेन, अकृन्तत्, तण्डुलकणान् ।

---

OR

**3(ख).**

अधोलिखित-संवादे रिक्तस्थानानि पूरयत । सूर्यकान्त: - किं जानासि चन्द्रिके ! अस्माकं देशस्य पूर्वनाम किम् आसीत् । चन्द्रिका - (i)___ । सूर्यकान्त: - सत्यमुक्तम् । आर्यावर्तस्य अर्थोऽस्ति-आर्याणां स्थानम् । अत्र आर्यशब्दस्य अर्थ: क: ? चन्द्रिका - (ii)___ । सूर्यकान्त: - शोभनम् । अत्र सर्वे श्रेष्ठा: जना: एव निवसन्ति स्म । भारतं नाम केन नाम्ना सञ्जातम् ? चन्द्रिका - (iii)___ । सूर्यकान्त: - शोभनम् भरत नाम्ना एव ऋषभदेवस्य पुत्र: चक्रवर्ती राजा भरत: आसीत् । एक: अन्य: अपि भरत: आसीत् । स: कस्य पुत्र: आसीत् ? चन्द्रिका - (iv)___ । सूर्यकान्त: - आम् शोभनम् । दशरथस्य ज्येष्ठ पुत्र: राम: आसीत् । रामसीताभ्यां सह क: वनं गतवान् ? चन्द्रिका - (v)___ । सूर्यकान्त: - शोभनम् । लक्ष्मणेन तु वने भक्तिपूर्वकं सीतारामयो: सेवा कृता । चतुर्दशवर्षपर्यन्तं राम: वने उषित्वा रावणं हत्वा च अयोध्यां प्रतिनिवृत्त: आसीत् ।

---

**4.**

निम्नलिखितवाक्येषु केषाञ्चन पञ्च वाक्यानां संस्कृतेन अनुवादं कुरुत :
(i) पुत्र अपने पिता के साथ गाँव जाता है । (The son goes to the village with his father.)
(ii) नदी के दोनों ओर वृक्ष हैं । (There are trees on both sides of the river.)
(iii) सरिता प्रतिदिन विद्यालय जाती है । (Sarita goes to school everyday.)
(iv) बालक कक्षा में श्लोक गाते हैं । (The boys sing shlokas in class.)
(v) हम सब भ्रमण के लिए चण्डीगढ़ गये थे । (We all went to Chandigarh for excursion.)
(vi) दिव्या कल वाराणसी जाएगी । (Divya will go to Varanasi tomorrow.)
(vii) कनिका के पिता अध्यापक हैं । (Kanika's father is a teacher.)

---

## Section C

### 5(i).

अधोलिखितवाक्येषु रेखाङ्कित पदानां सन्धिच्छेदं सन्धिं वा कुरुत ।
(केवलं छ: प्रश्न)
<u>नास्ति</u> कोऽपि अवकाश: ।

### 5(ii).

अधोलिखितवाक्येषु रेखाङ्कित पदानां सन्धिच्छेदं सन्धिं वा कुरुत ।
(केवलं छ: प्रश्न)
तदाहं <u>जीवन् + अपि</u> मृत: ।

### 5(iii).

अधोलिखितवाक्येषु रेखाङ्कित पदानां सन्धिच्छेदं सन्धिं वा कुरुत ।
(केवलं छ: प्रश्न)
तत्किमपि <u>यथेच्छं</u> प्रच्छ ।

### 5(iv).

अधोलिखितवाक्येषु रेखाङ्कित पदानां सन्धिच्छेदं सन्धिं वा कुरुत ।
(केवलं छ: प्रश्न)
शठ: <u>सहस्रैरपि</u> शिक्ष्यमाण: ।

### 5(v).

अधोलिखितवाक्येषु रेखाङ्कित पदानां सन्धिच्छेदं सन्धिं वा कुरुत ।
(केवलं छ: प्रश्न)
तद्वत् सुवर्णमिह <u>नैव</u> करोति नादम् ।

### 5(vi).

अधोलिखितवाक्येषु रेखाङ्कित पदानां सन्धिच्छेदं सन्धिं वा कुरुत ।
(केवलं छ: प्रश्न)
<u>एतदनुशासनम्</u> ।

### 5(vii).

अधोलिखितवाक्येषु रेखाङ्कित पदानां सन्धिच्छेदं सन्धिं वा कुरुत ।
(केवलं छ: प्रश्न)
<u>भोजश्चापि</u> चिरं प्रजा: पालितवान् ।

### 6(i).

अधोलिखितवाक्येषु रेखाङ्कित पदानाम् उचितं समस्तपदं विग्रहं वा प्रदत्तविकल्पेभ्य: चिनुत ।
<u>अलूक्षा:</u> धर्मकामा: स्यु: ।

(A) लूक्षा: अनु
(B) न लूक्षा:
(C) लूक्षाभाव:
(D) लूक्षस्य पश्चात्

### 6(ii).

अधोलिखितवाक्येषु रेखाङ्कित पदानाम् उचितं समस्तपदं विग्रहं वा प्रदत्तविकल्पेभ्य: चिनुत ।
<u>सुमित्रामात:</u> ! इतस्तावत् ।

(A) सुमित्रा मात:
(B) सुमित्रायै मात:
(C) सुमित्रा माता यस्य स: तत्सम्बुद्धौ
(D) सुमित्राया: मात:

## 6(iii).

अधोलिखितवाक्येषु रेखाङ्कित पदानाम् उचितं समस्तपदं विग्रहं वा प्रदत्तविकल्पेभ्यः चिनुत ।
परस्परमनुव्रतौ पतिपत्न्यौ त्रिवर्गं साधयतः ।

(A) त्रीन् वर्गान्
(B) त्रयः वर्गाः यस्य सः तम्
(C) वर्गाणाम् त्रयम्
(D) त्रयाणाम् वर्गाणाम् समाहारः

## 6(iv).

अधोलिखितवाक्येषु रेखाङ्कित पदानाम् उचितं समस्तपदं विग्रहं वा प्रदत्तविकल्पेभ्यः चिनुत ।
सः एवमभिज्ञाय त्वया यथोचितं व्यवहरिष्यति ।

(A) यथा उचितम्
(B) उचितम् अनतिक्रम्य
(C) उचितं यथा
(D) उचितस्य पश्चात्

## 6(v).

अधोलिखितवाक्येषु रेखाङ्कित पदानाम् उचितं समस्तपदं विग्रहं वा प्रदत्तविकल्पेभ्यः चिनुत ।
स्वयमेव कुलगुरुं पितरौ च सभाजयितुं गमिष्यावः ।

(A) माता च पिता च
(B) मातुः च पितुः च
(C) पिता च पिता च
(D) मात्रा च पित्रा च

## 6(vi).

अधोलिखितवाक्येषु रेखाङ्कित पदानाम् उचितं समस्तपदं विग्रहं वा प्रदत्तविकल्पेभ्यः चिनुत ।
इमां भविष्यवाणीं निशम्य मुञ्जो विच्छायवदनः अभूत् ।

(A) विच्छायम् वदनम् यस्य सः
(B) विच्छायः च वदनः च
(C) विच्छायम् अनतिक्रम्य
(D) विच्छायेन वदनेन सः

## 6(vii).

अधोलिखितवाक्येषु रेखाङ्कित पदानाम् उचितं समस्तपदं विग्रहं वा प्रदत्तविकल्पेभ्यः चिनुत ।
इत्यासीत् गुरोः पादानां मतम् ।

(A) गुरुपादानाम्
(B) गुरुपादाय
(C) गुरवेपादम्
(D) गुरुपादम्

## 7(i).

अधोलिखितवाक्येषु रेखाङ्कित पदानां समुचितं संयोजितं विभाजितं वा प्रकृति-प्रत्यययोगं प्रदत्त-विकल्पेभ्यः चिनुत ।
कृतालङ्कारभूतो गतः ।

(A) गम् + क्त
(B) गम् + क्तवतु
(C) गम् + तव्यत्
(D) गम् + अनीयर्

## 7(ii).

अधोलिखितवाक्येषु रेखाङ्कित पदानां समुचितं संयोजितं विभाजितं वा प्रकृति-प्रत्यययोगं प्रदत्त-विकल्पेभ्यः चिनुत ।
युधिष्ठिरः तां द्यूते हृ + णिच् + क्तवतु ।

(A) हृतवान्
(B) हर्तवान्
(C) हारितवान्
(D) हारितम्

## 7(iii).

अधोलिखितवाक्येषु रेखाङ्कित पदानां समुचितं संयोजितं विभाजितं वा प्रकृति-प्रत्यययोगं प्रदत्त-विकल्पेभ्यः चिनुत ।
सिद्धोऽहं बलवान् सुखी ।

(A) बल + मतुप्
(B) बल + क्तवतु
(C) बल + तल्
(D) बल + तव्यत्

### 7(iv).

अधोलिखितवाक्येषु रेखाङ्कित पदानां समुचितं संयोजितं विभाजितं वा प्रकृति-प्रत्यययोगं प्रदत्त-विकल्पेभ्य: चिनुत ।
तदाहं जीवन् अपि मृत: ।

(A) जीव् + शतृ
(B) जीव् + शानच्
(C) जीव् + क्त
(D) जीव् + तव्यत्

### 7(v).

अधोलिखितवाक्येषु रेखाङ्कित पदानां समुचितं संयोजितं विभाजितं वा प्रकृति-प्रत्यययोगं प्रदत्त-विकल्पेभ्य: चिनुत ।
शठ: सहस्रैरपि शिक्ष्यमाण: ।

(A) शिक्ष् + मतुप्
(B) शिक्ष् + शानच्
(C) शिक्ष् + वतुप्
(D) शिक्ष् + शतृ

### 7(vi).

अधोलिखितवाक्येषु रेखाङ्कित पदानां समुचितं संयोजितं विभाजितं वा प्रकृति-प्रत्यययोगं प्रदत्त-विकल्पेभ्य: चिनुत ।
राजकुमार + ङीप् सर्वविद्या निष्णाता जाता ।

(A) राजकुमारी
(B) राजकुमार्य:
(C) राजकुमारि
(D) राजकुमारीणाम्

### 7(vii).

अधोलिखितवाक्येषु रेखाङ्कित पदानां समुचितं संयोजितं विभाजितं वा प्रकृति-प्रत्यययोगं प्रदत्त-विकल्पेभ्य: चिनुत ।
अत्रभवन्त: नारी-स्वाधीनताम् अधिकृत्य किं कथयन्ति ?

(A) स्वाधीन + टाप्
(B) स्वाधीन + तल्
(C) स्वाधीन + क्तवतु
(D) स्वाधीन + क्त

### 8(i).

समुचितम् उपपद-विभक्तिरूपं चिनुत । (केवलं प्रश्नत्रयम्)
___ न प्रमदितव्यम् ।

(A) कुशलाय
(B) कुशलेन
(C) कुशलात्
(D) कुशलम्

### 8(ii).

समुचितम् उपपद-विभक्तिरूपं चिनुत । (केवलं प्रश्नत्रयम्)
हा ! धिक् ___ ।

(A) अस्मात्
(B) अस्मान्
(C) अस्मभ्यम्
(D) अस्माकम्

### 8(iii).

समुचितम् उपपद-विभक्तिरूपं चिनुत । (केवलं प्रश्नत्रयम्)
महाराज शिववीरस्य ___ वयं शिरसा वहाम: ।

(A) आज्ञा
(B) आज्ञाम्
(C) आज्ञया
(D) आज्ञाया:

### 8(iv).

समुचितम् उपपद-विभक्तिरूपं चिनुत । (केवलं प्रश्नत्रयम्)
किं गुरुवर्यै: ___ अधिकृत्य पित्रे कथितम् ?

(A) माम्
(B) अहम्
(C) मह्यम्
(D) मम

## Section D

**9.**

मातृदेवो भव । पितृदेवो भव । आचार्यदेवो भव । अतिथिदेवो भव । यानि अनवद्यानि कर्माणि, तानि सेवितव्यानि, नो इतराणि । यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि, नो इतराणि । अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात् । ये तत्र ब्राह्मणा: सम्मर्शिन:, युक्ता आयुक्ता:, अलूक्षा: धर्मकामा: स्यु:, यथा ते तत्र वर्तेरन् तथा तत्र वर्तेथा: । एष आदेश: । एष उपदेश: । एषा वेदोपनिषत् ।

**9(अ).** एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्) / Answer in one word : (Only two questions)

(i) पिता क: भव ?

(ii) इतराणि (निन्द्यानि) कानि न सेवितव्यानि ?

(iii) एषा का ?

**9(आ).** पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्) / Answer in a complete sentence : (Only two questions)

(i) ब्राह्मणा: कीदृशा: स्यु: ?

(ii) कीदृशानि कर्माणि सेवितव्यानि ?

(iii) कानि त्वयोपास्यानि ?

**9(इ).** यथानिर्देशम् उत्तरत : (केवलं प्रश्नद्वयम्) / Answer as directed : (Only two questions)

(i) 'वर्तेरन्' इति क्रियापदस्य कर्तृपदं किम् ?

(ii) 'कर्माणि' इति पदस्य विशेषणपदं किम् ?

(iii) 'दुश्चरितानि' इति पदस्य विपर्ययपदं किम् ?

**10.**

गुणी गुणं वेत्ति न वेत्ति निर्गुण:, बली बलं वेत्ति न वेत्ति निर्बल: ।
पिको वसन्तस्य गुणं न वायस:, करी च सिंहस्य बलं न मूषक: ।।

**10(अ).** एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्) / Answer in one word : (Only two questions)

(i) गुणी कं वेत्ति ?

(ii) पिक: कस्य गुणं जानाति ?

(iii) निर्बल: कं न वेत्ति ?

**10(आ).** पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्) / Answer in a complete sentence : (Only two questions)

(i) सिंहस्य बलं क: न जानाति ?

(ii) सिंहस्य बलं क: जानाति ?

(iii) वायस: कस्य गुणं न जानाति ?

**10(इ).** यथानिर्देशम् उत्तरत : (केवलं प्रश्नद्वयम्) / Answer as directed : (Only two questions)

(i) 'काक:' इति पदस्य पर्यायपदं किम् ?

(ii) 'निर्बल:' इति पदस्य विपर्ययपदं किम् ?

(iii) 'गुणी' इति कर्तृपदस्य क्रियापदं किम् ?

## 11.

मदालसा - (हसित्वा) नहि जानन्ति ते यदहं तु विवाहबन्धनं स्वीकर्तुं न इच्छामि ।
कुण्डला - किं करिष्यसि तदा ?
मदालसा - ब्रह्मवादिनी भविष्यामि । आचार्येति पदं प्राप्य शिष्येभ्य: जीवनकलां शिक्षयिष्यामि ।
कुण्डला - जाने तेऽभिरुचिम् अध्ययने अध्यापने च । परं यथा लतेयं सहकारमवलम्बते तथैव नारी जीवनयात्रायां कमपि सहचरम् अपेक्षते य: तस्या: अवलम्बनं स्यात् ।
मदालसा - नास्ति मत्कृते आवश्यकता अवलम्बनस्य । स्वयं समर्था जीवनपथे चलितुमहं न कस्यापि सङ्केतै: नर्तितुं पारयामि ।
कुण्डला - नर्तिष्यसि तदा एकाकिनी एव ।
मदालसा - (विहस्य) यदि त्वं शीघ्रमेव पतिगृहं गमिष्यसि तदा एकाकिनी भविष्यामि परम् एक: उपाय: अपि चिन्तित: मया ।
कुण्डला - क: उपाय: ?
मदालसा - सङ्गीत साहित्य-माध्यमेन ब्रह्मविद्यां सरसां विधाय बहुभ्य: शिशुभ्य: शिक्षणं प्रदास्यामि ।

---

**11(अ).** एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्) / Answer in one word : (Only two questions)

(i) मदालसा का भविष्यति ?

(ii) लता कम् अवलम्बते ?

(iii) मदालसा कस्य आवश्यकतां न अनुभवति ?

---

**11(आ).** पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्) / Answer in a complete sentence : (Only two questions)

(i) मदालसा हसित्वा स्वविवाहविषये कुण्डलां प्रति किं कथयति ?

(ii) मदालसा आचार्येति पदं प्राप्य किं करिष्यति ?

(iii) नारी जीवनयात्रायां किम् अपेक्षते ?

---

**11(इ).** यथानिर्देशम् उत्तरत : (केवलं प्रश्नद्वयम्) / Answer as directed : (Only two questions)

(i) 'गमिष्यसि' इति क्रियापदस्य कर्तृपदं किं प्रयुक्तम् ?

(ii) 'बहुभ्य:' इति विशेषणपदस्य विशेष्यपदं किम् ?

(iii) 'अहम् न कस्यापि सङ्केतै: नर्तितुं पारयामि' अत्र वाक्ये 'अहम्' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

---

## 12(क).

अधोलिखितस्य पद्यस्य भावार्थं मञ्जूषाप्रदत्तशब्दै: पूरयित्वा पुन: लिखत । त्रैलोक्यं दग्धुकामेव, ललाटपुटसंस्थिता । भृकुटिर्लक्ष्मणस्यैषा, नियतीव व्यवस्थिता ।। भावार्थ: सौमित्रस्य एषा (i)___ स्थिता भृकुटि: सर्वां (ii)___ दग्धुमिच्छन्ती नियति: इव (iii)___ अस्ति ।
मञ्जूषा: भुवं, मस्तकमध्ये, सुस्थिता ।

---

OR

## 12(ख)(अ).

प्रदत्तभावार्थत्रयात् शुद्धं भावार्थं चित्वा लिखत । अनन्यशासनामुर्वीं शशासैकपुरीमिव ।

(A) न अन्यशासकेन शासितां पृथ्वीम् एकपुरीमिव शासनं चकार ।

(B) अन्यशासकेन शासितां वसुधां शशास ।

(C) स्वशासकेन शासितं नगरं रक्षितवान् ।

---

OR

## 12(ख)(आ).

प्रदत्तभावार्थत्रयात् शुद्धं भावार्थं चित्वा लिखत । मया दृढं परीक्षितोऽसि ।

(A) मया त्वं परीक्ष्यसे ।

(B) त्वं मम परीक्षां करोषि ।

(C) अहं तव कठिनपरीक्षां कृतवान् ।

---

OR

## 12(ख)(इ).

प्रदत्तभावार्थत्रयात् शुद्धं भावार्थं चित्वा लिखत । इदमस्तीदमपि मे भविष्यति पुनर्धनम् ।

(A) मम पार्श्वे एतन्मात्रं धनमस्ति, परम् इत: अत्यधिकमपि धनम् अहं प्राप्स्यामि ।

(B) इदं वस्तु ममास्ति अन्यमपि मम एव स्यात् ।

(C) इदमस्ति इति चिन्तयित्वा कोऽपि सन्तुष्ट: न भवति ।

**13.**

अधोलिखितश्लोकस्य प्रदत्ते अन्वये रिक्तस्थानानि मञ्जूषाप्रदत्तशब्दानां सहायतया पूरयत । अक्षोभ्यः क्षोभितः केन, लक्ष्मणो धैर्यसागरः । येन रुष्टेन पश्यामि, शताकीर्णमिवाग्रतः ।।
अन्वयः केन अक्षोभ्यः (i)___ लक्ष्मणः क्षोभितः येन (ii)___ शताकीर्णम् इव (iii)___ पश्यामि ।
मञ्जूषाः रुष्टेन, धैर्यसागरः, अग्रतः ।

---

**14.**

क स्तम्भस्य वाक्यानां ख स्तम्भस्य उपयुक्तवाक्यैः सह मेलनं कुरुत । क स्तम्भः (i) ईश्वरोऽहमहं भोगी (ii) अपि श्रुताः भवद्भिः (iii) विशेषतः सर्वविदां समाजे (iv) नैकेनापि समं गता वसुमती
ख स्तम्भः (1) नूनं त्वया यास्यति (2) सिद्धोऽहं बलवान् सुखी (3) मम सखीविचाराः (4) विभूषणं मौनमपण्डितानाम्

---

**15.**

अधोलिखितवाक्येषु रेखाङ्कित-पदानां प्रसङ्गानुसारं शुद्धम् अर्थं मञ्जूषातः चित्वा लिखत ।
(i) यदि ते कर्मविचिकित्सा वा ।
(ii) रोदितव्ये काले सौमित्रिणा धनुर्गृहीतम् ।
(iii) त्यागाय संभृतार्थानां सत्याय मितभाषिणाम् ।
(iv) सेतुर्येन महोदधौ विरचितः क्वासौ दशास्यान्तकः ।
मञ्जूषाः रावणनाशकः, कर्मसन्देहः, लक्ष्मणेन, अल्पभाषिणाम् ।

---

**16(i).**

अधोलिखितप्रश्नानाम् उत्तराणि लिखत । (केवलं प्रश्नत्रयम्)
'नैकेनापि समं गता वसुमती' इत्यस्य पाठस्य सन्दर्भग्रन्थः कः ?

---

**16(ii).**

अधोलिखितप्रश्नानाम् उत्तराणि लिखत । (केवलं प्रश्नत्रयम्)
श्रीमद्भगवद्-गीतायाः लेखकः कः ?

---

**16(iii).**

अधोलिखितप्रश्नानाम् उत्तराणि लिखत । (केवलं प्रश्नत्रयम्)
'मदालसा' पाठस्य लेखिका का ?

---

**16(iv).**

अधोलिखितप्रश्नानाम् उत्तराणि लिखत । (केवलं प्रश्नत्रयम्)
'शिवराजविजयम्' इति ग्रन्थस्य रचनाकारः कः ?

---

**17(i).**

मञ्जूषायां प्रदत्तशब्दानां साहाय्येन रिक्तस्थानानि पूरयित्वा लिखत ।
मञ्जूषाः गद्यम्, बाणभट्टः, खण्डकाव्यम्, प्रारम्भे ।
नान्दी नाटकस्य ___ भवति ।

---

**17(ii).**

मञ्जूषायां प्रदत्तशब्दानां साहाय्येन रिक्तस्थानानि पूरयित्वा लिखत ।
मञ्जूषाः गद्यम्, बाणभट्टः, खण्डकाव्यम्, प्रारम्भे ।
'कादम्बरी' इति ग्रन्थस्य लेखकः ___ अस्ति ।

---

**17(iii).**

मञ्जूषायां प्रदत्तशब्दानां साहाय्येन रिक्तस्थानानि पूरयित्वा लिखत ।
मञ्जूषाः गद्यम्, बाणभट्टः, खण्डकाव्यम्, प्रारम्भे ।
छन्दोरहिता रचना ___ कथ्यते ।

---

**17(iv).**

मञ्जूषायां प्रदत्तशब्दानां साहाय्येन रिक्तस्थानानि पूरयित्वा लिखत ।
मञ्जूषाः गद्यम्, बाणभट्टः, खण्डकाव्यम्, प्रारम्भे ।
कालिदासेन रचितं 'मेघदूतम्' ___ अस्ति ।

---

**18.**

समुचितं मेलयत । क स्तम्भः (i) स्वप्नवासवदत्तम् (ii) नाट्यशास्त्रम् (iii) नाटकस्य प्रधानम् अङ्गम् (iv) हास्यकलाकारः
ख स्तम्भः (1) भरतमुनिः (2) महाकविः भासः (3) विदूषकः (4) अभिनयः

---

**- End of Question Paper -**